तच्चक्ररूपं यथा ।




सप्तनामा, स्त्री, (सप्त नामानि यस्याः । "डाबुभाभ्यामन्यतरस्याम् ।" ४ । १ । १३ । इति डाप् ।) आदित्यभक्ता । इति राजनिर्घण्टः ॥

सप्तपत्रः, पुं, (सप्त सप्त पत्राणि यस्य ।) मुद्गरवृक्षः । इति राजनिर्घण्टः ॥

सप्तपदी, स्त्री, सप्तानां पदानां समाहारः । ("द्विगोः ।" ४ । १ । २१ । इति ङीप् ।) इति व्याकरणम् ॥ विवाहाङ्गसप्तपदीगमनं यथा । ततो जामाता प्रागुदीचीं गत्वा वधूं सप्तभिर्मन्त्रैः सप्तमण्डलिकासु सप्तपदानि नयेत् । वध्वश्च दक्षिणपादं नीत्वा पश्चाद्वामपादं मण्डलिकां नयेत् जामाता च वधूं ब्रूयात् । वामेन पादेन दक्षिणं पादमाक्रम्येति । सप्तानां मन्त्राणामृष्यादयः साधारणाः । प्रजापतिरृषिरेकपाद्विराट् छन्दो विष्णुर्देवता पादाक्रमणे विनियोगः । ॐ एकमिषे विष्णुस्त्वा नयतु । द्वे ऊर्ज्जे विष्णुस्त्वा नयतु । त्रीणि व्रताय विष्णुस्त्वा नयतु । चत्वारि मायोभवाय विष्णुस्त्वा नयतु । पञ्च पशुभ्यो विष्णुस्त्वा नयतु । षड्रायस्पोषाय विष्णुस्त्वा नयतु । सप्त सप्तभ्यो होत्राभ्यो विष्णुस्त्वा नयतु ॥ ततः सप्तमं पदं गतां वधूं पतिराशास्ते । प्रजापतिरृषिर्गायत्रीच्छन्दः कन्या देवता पादाक्रमणानन्तरमाशासने विनियोगः । सखा सप्तपदी भव सख्यन्ते गमेयं सख्यन्ते मा योषा सख्यन्ते मायोष्ठाः । इति सप्तपदीगमनम् । इति भवदेवभट्टः ॥

सप्तपर्णी, स्त्री, (सप्तानां द्राक्षादीनां पर्णमिव यत्र ।) मिष्टान्नविशेषः । यथा,—

"द्राक्षादाडिमखर्ज्जूरस्फूर्जिताम्रं सशर्करम् ।
लाजचूर्णं समध्वाज्यं सप्तपर्णमुदाहृतम् ॥"

इति शब्दचन्द्रिका ॥

सप्तपर्णः, पुं, (सप्त सप्त पर्णानि यस्य ।) वृक्षविशेषः । छातिम् इति भाषा ॥ (यथा, रघुः । ४ । २३ ।

"प्रसवैः सप्तपर्णानां मदगन्धिभिराहताः ।
असूययेव तन्नागाः सप्तधैव प्रसुस्रुवुः ॥")

तत्पर्य्यायः । विशालत्वक् २ शारदी ३ विषमच्छदः ४ । इत्यमरः ॥ शारदः ५ देववृक्षः ६ दानगन्धिः ७ शिरोरुजा ८ बहुनाशः ९ शुक्तिपर्णः १० बृहत्त्वक् ११ अहनाशनः १२ । इति शब्दरत्नावली ॥ गुच्छपुष्पः १३ अक्षिपर्णः १४ सुपर्णकः १५ । इति जटाधरः ॥ बृहत्त्वक् १६ इति रत्नमाला ॥ अस्य गुणाः ।

"सप्तपर्णो व्रणश्लेष्मवातकुष्ठास्रजन्तुजित् ।
दीपनः श्वासगुल्मघ्नः स्निग्धोष्णस्तुवरः स्मृतः ॥"

अन्यत् सप्तच्छदशब्दे द्रष्टव्यम् ॥

सप्तपर्णी, स्त्री, (सप्त सप्त पर्णान्यस्याः । ङीष् ।) लज्जालुलता । इति रत्नमालाराजनिर्घण्टौ ॥

सप्तपातालं, क्ली, (सप्तानां पातालानां समाहारः ।) सप्तसंख्यकाधोभुवनम् । यथा,—

"आदित्यरश्मितो देवो रुद्ररूपी जनार्द्दनः ।
निःसृत्य प्रथमं यातः पातालतलमन्ततः ॥
सप्तपातालसंस्थांस्तु नागगन्धर्व्वराक्षसान् ।
देवान्तकांश्च शेषांश्च जघान त्रशूलहृक् ॥"

इति कालिकापुराणे २४ अध्यायः ॥

तन्नामानि यथाह भरतः ।

"अतलं वितलञ्चैव नितलञ्च गभस्तिमत् ।
महाख्यं सुतलञ्चाग्र्यं पातालं सप्तमं विदुः ॥"

सप्तपुत्त्रसूः, स्त्री (सप्त पुत्त्रान् सूते इति । सू + क्विप् ।) सप्तपुत्त्रप्रसूता । तत्पर्य्यायः । सुतवस्करा २ । इति त्रिकाण्डशेषः ॥

सप्तभद्रः, पुं, (सप्तसु स्थानेषु भद्रमस्य ।) शिरीषवृक्षः । इति शब्दचन्द्रिका ॥

सप्तमः, त्रि, (सप्तन् + "तस्य पूरणे डट् ।" ५ । २ । ४८ । इति डट् । "नान्तादसंख्यादेर्मट् ।" ५ । २ । ४९ । इति डटो मडागमः ।) सप्तानां पूरणः । सातइ इत्यादि भाषा । यथा,—

"लेपभाजश्चतुर्थाद्याः पित्राद्याः पिण्डभागिनः ।
पिण्डदः सप्तमस्तेषां सापिण्ड्यं साप्तपौरुषम् ॥"

इति शुद्धितत्त्वम् ॥

सप्तमी, स्त्री, (सप्तन् + टित्त्वात् ङीप् ।) तिथिविशेषः । चन्द्रस्य सप्तमकलाक्रिया । तत्र शुक्लपक्षे अमृतपूर्त्तावच्छिन्नसप्तमकलाक्रिया । कृष्णपक्षे तु अमृतह्रासानुकूलसप्तमकलाक्रियेति विशेषः । पञ्जिकायां तस्या अङ्कः शुक्लपक्षे ७ कृष्णपक्षे २२ ॥ * ॥ तत्र जातफलम् ।

"कन्याप्रजो वैरीकुलेभसिंहो
विशालनेत्रः प्रथितप्रभावः ।
देवद्विजार्च्चारसिको महात्मा
स्यात् सप्तमीजः परवित्तहर्त्ता ॥"

इति कोष्ठीप्रदीपः ॥ * ॥

अथ सप्तमी । सा च षष्ठीयुता ग्राह्या युग्मात् । पैठीनसिवचनाच्च । यथा,—

"पञ्चमी सप्तमी चैव दशमी च त्रयोदशी ।
प्रतिपन्नवमी चैव कर्त्तव्या सम्मुखी तिथिः ॥"

सांमुख्यमुक्तं स्कान्दे ।

"सांमुख्यं नाम सायाह्नव्यापिनी दृश्यते यदा ।"

अतएव परदिने त्रिसन्ध्यकालाव्यापित्वे षष्ठीयुक्तसप्तम्यामुपवासमाह भविष्यपुराणम् ।

"षष्ठीसमेता कर्त्तव्या सप्तमी नाष्टमीयुता ।
पतङ्गोपासनायेह षष्ठ्यामाहुरुपोषणम् ॥"

यथा उपोषणे तथा कर्म्मान्तरे । तथा ।

"षष्ठ्या युता सप्तमी च कर्त्तव्या सर्व्वदा तिथिः ।
षष्ठी च सप्तमी यत्र तत्र सन्निहितो हरिः ॥"

इति स्कन्दपुराणात् ॥ तथा ।

"शुक्लपक्षस्य सप्तम्यां सूर्य्यवारो यदा भवेत् ।
सप्तमी विजया नाम तत्र दत्तं महाफलम् ॥"

भविष्ये ।

"शालितण्डुलप्रस्थस्य कुर्य्यादन्नं सुसंस्कृतम् ।
सूर्य्याय चरुकं दत्त्वा सप्तम्याञ्च विशेषतः ॥
यावन्तस्तण्डुलास्तस्मिन् वेद्यो परिसंख्यया ।
तावद्वर्षसहस्राणि सूर्य्यलोके महीयते ॥"

गोपथब्राह्मणम् ।

"द्वात्रिंशत्पलिकं प्रस्थमुक्तं स्वयमथर्व्वणा ॥"

ज्योतिषे ।

"पलन्तु लौकिकैर्म्मानैः साष्टरक्तिद्विमाषकम् ।
तोलकत्रितयं प्रोक्तं ज्योतिज्ञैः स्मृतिसम्मतम् ॥"

तेन चतूरक्तिकाधिकमाषपञ्चकाधिकषडधिकशततोलकमिताः प्रस्थतण्डुलाः । इति । एवञ्चैतन्न्यूनाधिकयोः फलतारतम्यं बोध्यम् । एवं देवतान्तरेऽपि तत्तल्लोकमहितत्वफलेन कल्पयितुं युक्तम् । अतएव शिवेऽप्येवं वक्ष्यते ॥ * ॥ वराहपुराणे ।

"अथापरं महाराज व्रतमारोग्यसंज्ञितम् ।
कथयामि परं पुण्यं सर्व्वपापप्रणाशनम् ॥
तस्यैव माघमासस्य सप्तम्यां समुपोषितः ।
पूजयेद्भास्करं देवं विष्णुरूपं सनातनम् ॥
आदित्य भास्कर रवे भानो सूर्य्य दिवाकर ।
प्रभाकरेति संपूज्यो देवः सर्व्वेश्वरो रविः ॥
षष्ठ्याञ्चैकभक्ताहारः सप्तम्यां समुपोषितः ।
अष्टम्याञ्चैव भुञ्जीत एष एव विधिः स्मृतः ॥
अनेन वत्सरं पूर्णं विधिना योऽर्च्चयेद्रविम् ।